# Purushottama-Gitika

# પુરુષોત્તમ-ગીતિકા

## Document Information

Text title : Purushottama Gitika

File name : puruShottamagItikA.itx

Category : vishhnu, sanskritgeet, krishna, hkmeher

Location : doc_vishhnu

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : M□trig□tik□□jalih

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 31, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2023

*sanskritdocuments.org*

# પુરુષોત્તમ-ગીતિકા

પ્રણમામિ તમ્,
પ્રણમામિ તં ભુવિ વન્દિતમ્ ;
જન-હૃદય-મન્દિર-નન્દિતમ્ ।
જગન્નાથં પરાત્માનં
સર્વ-તનુષુ સ્પન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ (ધ્રુવમ્)॥

પુરુષોત્તમં લીલામયમ્,
અવિનાશિનં વિભુમવ્યયમ્ ।
ધૃત-દારુ-દૈવત-વિગ્રહમ્,
પ્રણવ-રૂપં પ્રણમામ્યહમ્ ।
બ્રહ્મ હંસં સ્વપ્રકાશં
શ્રુતિષુ સત્પ્રતિપાદિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૧॥

બલભદ્ર-ભદ્રાભ્યાં સમમ્,
નમ ચિત્ત ! તં પુરુષોત્તમમ્ ।
ત્રિગુણાત્મકં રત્ન-ત્રયમ્,
ભૂર્ભુવઃસ્વઃ - પરમાલયમ્ ।
દીનબન્ધું દયાસિન્ધું
ભક્તિ-પુષ્પ-નિવેદિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૨॥

વારાંનિધિ-તટ-નિકેતનમ્,
ભજ પતિતપાવન-કેતનમ્ ।

શ્રિત-નીલગિરિવર-કન્દરમ્,
સત્યં શિવં ચિર-સુન્દરમ્ ।
શઙ્ખનાભિ- ક્ષેત્ર-સુભગં
સાધુ-જનાભિનન્દિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૩॥

શરણાર્તિ-હરણ-પરાયણમ્,
પ્રભુમનન્તં નારાયણમ્ ।
વૃત-જગજ્જનની-સુસ્મિતમ્,
વાસુદેવં વિનતોઽસ્મિ તમ્ ।
આદિકન્દં શ્રીમુકુન્દં
વિબુધ-વૃન્દામોદિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૪॥

તુલસી-લસિત-સીતાવરમ્,
ચૈતન્ય-નુત-મુરલીધરમ્ ।
ભૈરવં ભજે ગજાનનમ્,
ખગ-વાહનં સસુદર્શનમ્ ।
ઇન્દિરેશં દિવ્ય-વેશં
બુદ્ધ-રૂપમનિન્દિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૫॥

રથ-મહોત્સવે જગત્પતે !
ત્વયિ મન્દિરાદ્ બહિરાગતે ।
જન-લોચનં ગોવિન્દ ! તે,
શુભ-દર્શન-રસં વિન્દતે ।
નન્દિઘોષ- સ્યન્દન-ગતં
શઙ્ખ-ઘણ્ટા-નાદિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૬॥

ત્વયિ ધર્મ-સકલં લીયતે,
ત્વયિ કર્મ-સકલં ક્ષીયતે ।
ચરણં તવ કલુષ-વારણમ્,
શરણં હરે ! મમ તારણમ્ ।
ભવતુ નામા- મૃતં શિવદં
સ્વાન્ત-તન્ત્રી-સ્યન્દિતમ્ ।
પ્રણમામિ તં ભુવિ વન્દિતમ્ ।
પ્રણમામિ તમ્ ॥ ૭॥

– ગીત-રચના : ડૉ હરેકૃષ્ણ-મેહેરઃ
("માતૃગીતિકાઞ્જલિઃ" - કાવ્યતઃ)

Copyright Dr.Harekrishna Meher

---

*Purushottama-Gitika*
pdf was typeset on October 30, 2023

Please send corrections to *sanskrit@cheerful.com*